RNI No. DELSAN/2014/55803
Postal Regn No. G-3/DL(N)373/2021-23

ISSN 2349-0586 and Approved by UGC
(UGCJournal No. 40993, Sr. No. 1279)

Date of Publishing: 16.003.2021
Date of Posting 20-21.03.2021
Pages -8

॥ श्रीवेदपुरुषाय नमः॥

# संस्कृतवाणी

पाक्षिकसंस्कृतपत्रम्

प्रकाशकीयकार्यालयः एवं सम्पादकीयकार्यालयः - १७४, रामानुजमार्गः, इब्राहिमपुरम्, देहली-११००३६ पृष्ठाः ८

मूल्यम्-रू. ५/- सम्पर्कसूत्रम् - 9818378284, 9810429487 अणुसङ्ख्या- sanskritvanipatram@gmail.com, sanskritvanee@gmail.com


दिनाङ्कः १६ मार्च २०२१तः ३१ मार्च २०२१पर्यन्तम्

देहली/पाक्षिकी - वर्षः ७ अङ्कः २४ (१६८)

## प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः संस्कृतप्रेम

नवदेहली। प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना 28.02.2021तमे दिनाङ्के रविवासरे **मन की बात** इति जनवार्ताकार्यक्रमे संस्कृतविषयकं चर्चात्रयं विहितम्, येन तस्य संस्कृतप्रेम प्रकटीभवति। **प्रथमा चर्चा** आसीत्- कश्चिद् यात्रामार्गदर्शकः संस्कृते 'स्टैच्यू ऑफ यूनिटी' इति स्मृतिसंग्रहालयस्य विषये व्याचक्षाण आसीत् इति। **द्वितीया चर्चा** आसीत्- कश्चिज्जनः साक्षात्संस्कृतभाषायां क्रिकेटस्य क्रीडकटिप्पणीं कुर्वन् आसीत् इति। श्रीनरेन्द्रमोदिना स्वयमपि 'संस्कृते क्रिकेटक्रीडा' इति विषये विचारविमर्शो विहितः। गतदिनेषु वाराणीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्राङ्गणे संस्कृतक्रिकेटक्रीडा-प्रतियोगिता





समायोजिता। तत्र समेऽपि क्रीडकाः स्वीये पारम्परिकवेषे धृतधौतवस्त्राः सतिलकमस्तकाः तत्र क्रीडामकुर्वन्। न च तावदेव अपि तु तत्र क्रीडकटिप्पणी अपि देववाण्या एवाभवत्। तच्च यथा- शास्त्रार्थमहाविद्यालयस्य छात्रो विक्रमपाण्डेयः प्रथमकन्दुकप्रक्षेपणं कृतवान्। इण्टरनेशनल चन्द्रमौलि सोसाइटी इत्यस्य कान्हा ब्रह्मचारी प्रतिकारं कृतवान्। विक्रमः धावनं प्रारब्धवान्, निर्णायकम् उल्लंघ्य एवं च दक्षिणपक्षतः कन्दुकप्रक्षेपणम् कृतवान्। इदं कन्दुकं त्रिदण्डदक्षिणतः किञ्चिद् दूरं गतम् इति प्रकारेण।

एतमेव अधिकृत्य प्रधानमन्त्री श्रीनरेन्द्रमोदी उक्तवान् यत् सांस्कृतिकविधासु क्रिकेटक्रीडा एव केवलं न स्यात् अपि तु अन्याभिरपि (शेषभागः सप्तमपुटे)

## डॉ. ऋषिराजपाठकाय साहित्याकादमी-युव-पुरस्कारः

नवदेहली। साहित्याकादम्या 2020 तमाब्दीय-साहित्याकादमीयुवपुरस्कारार्थं संस्कृतयुवकवेः डॉ. ऋषिराजपाठकस्य नाम चितम् अस्ति। अयं पुरस्कारः तस्य आद्योन्मेषाख्ये संस्कृतकाव्यसंकलने घोषितः। आद्योन्मेषे पञ्चसु उन्मेषेषु 51कवितानां संकलनम् अस्ति। अस्मिन् काव्यसंकलने शतकद्वयम्, एका पञ्चाशिका, नैकानि




स्तोत्राणि, स्फुटपद्यानि, गीतानि, लघुकाव्यानि विभिन्नवृत्तेषु उपनिबद्धानि। ऋषिराजपाठकः किशोरावस्थात एव संस्कृते काव्यं करोति। तस्य काव्यप्रस्तुतिः देशस्य विविधेषु मञ्चेषु दूरदर्शने आकाशवाण्यां च भवति। तस्य श्रीमदूधमसिंहचरितम् इत्येतन्नामकमेकम् ऐतिहासिकं खण्डकाव्यमप्यास्ते। एतदतिरिच्य तस्य नवग्रहचरितम् ऋतुसत्रं चेत्यादीनि नैकानि नृत्यकाव्यानि अपि सन्ति। इतः पूर्वं तस्मै पण्डितप्रतापनारायणमिश्रस्मृतियुवसाहित्यकारसम्मानः अपि भाऊराव-देवरस-सेवान्यासेन अर्पित आसीत्। संस्कृतवाणीपक्षतः डॉ. ऋषिराजपाठकाय बहुशो वर्धापनानि।

## संयुक्तराष्ट्रसुरक्षापरिषदि प्रथमवारं संस्कृतमन्त्राणां गुञ्जनम्

नवदेहली। संयुक्तराष्ट्रशिक्षापरिषदि 24.02.2021तमे दिनाङ्के प्रथमवारं देववाण्याः संस्कृतस्य मन्त्राणां दिव्यगुञ्जनम् अभवत्। तत्र केन्द्रीयपर्यावरणमन्त्रिणा श्रीप्रकाशजावडेकरमहोदयेन संस्कृते शुक्लयजुर्वेदस्य शान्तिमन्त्रेण सह स्वविचारः प्रास्तावि। स चायं मन्त्रः- द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि। अनेन मन्त्रमाध्यमेन प्रकृतौ तथा च सर्वेषु जीववनस्पतिप्रभृतिषु निरन्तरं शान्तिः स्यादिति सम्प्रार्थ्यते।

जावडेकरमहोदयेन अग्रे निगदितं यद् जलवायु-परिवर्तनाय नान्यास्ति सर्वमान्या पद्धतिः, यया सम्यक्प्रकारेण जलवायुपरिवर्तनस्य सम्यक्परीक्षणं क्रियेत तथापि जलवायु-परिवर्तनाय 2020पर्यन्तं प्रास्ताविकं लक्ष्यं प्रति समैरपि



देशैः स्वकीया प्रतिबद्धता अवश्यमेव पूरणीया। जी-20-सङ्घदेशेषु जलवायुपरिवर्तनीयलक्ष्यपूर्तिसम्पादने भारतदेश एव साधितलक्ष्यं पूरितवान् तथा च पेरिसप्रस्तावना (पेरिससमझौता) इत्यत्रापि अग्रेसरो भूत्वा कार्याणि च समपादयत। तथा च सौर-ऊर्जसां सम्बन्धे प्रथमगणनागण्यो देशोऽयं भारतः।

## समस्तज्ञानविज्ञाननिधि संस्कृतवाङ्मयम्

संस्कृतवाङ्मयं हि विश्वस्य समस्तज्ञानविज्ञानेन परिपूर्णं वर्तते। देववाण्या संस्कृतेन हि भारतीयसंस्कृतेः वैभवस्य अनुशीलनं कर्तुं शक्यते। अतः समेषु शास्त्रेषु शलाका-परीक्षा भवेत्, येन छात्राणां सर्वेषु शास्त्रेषु रुचिः वर्धेत- इत्येते विचाराः काशीविद्वत्परिषद अध्यक्षैः पद्मश्रीविभूषितैः आचार्यरामयत्नशुक्लवर्यैः उदीरिताः, ये संस्कृतभारत्या 21.02.2021तमे दिनाङ्के समायोजितायाः अखिलभारतीयशलाकापरीक्षायाः समापनसत्रेऽध्यक्षरूपेण सभासदान् सम्बोधयन्त आसन्। (शेषभागः सप्तमपुटे)



## समायोजितः महर्षिपाणिनिसम्मानसमारोहः

भिवानी। हरियाणायां पूर्वमध्यमोत्तरमध्यमाकक्षाणां सञ्चालनं हरियाणाशिक्षाबोर्ड, भिवानीतः साधयितुं स्वीयां भूमिकाम् उद्वहन्तस्तत्रत्याः निदेशकाः डॉ.जगबीरसिंहमहोदयाः गोशालामार्केटमार्गस्थिते श्रीसनातनधर्म-संस्कृतमहाविद्यालये फरवरीमासस्य अष्टादशे दिनाङ्के **पाणिनि-सम्मानेन** सम्मानिताः। महाविद्यालयस्य प्राचार्यैः श्रीविनयमिश्रैः प्रोक्तं यत् हरियाणासर्वकारः प्रदेशे संस्कृतभाषायाः प्रचाराय प्रसाराय च पूर्वमध्यमोत्तरमध्यमादिकक्षाणां सञ्चालनरूपम् उत्तरदायित्त्वं हरियाणाविद्यालाय-शिक्षाबोर्ड इत्यस्मै दातुं निर्णयमकरोत्। मुख्यमन्त्रिणां श्रीमनोहरलालमहाभागानां अस्मिन् संस्कृत-भाषोत्थानस्य सार्थकप्रयासे नैकेऽवरोधाः समायाताः (शेषभागः सप्तमपुटे)



# सम्पादकीयम्

## संस्कृतायापेक्षितं परस्परसाहाय्यम्

संसरतीति संसारः' इति व्युत्पत्त्या सर्वोऽपि सांसारिकपदार्थः प्रतिक्षणं परिवर्तते। तस्मिन्नेव समेऽपि प्राणिनः, जन्तवः, निर्जीववस्तूनि चान्तर्भूतानि भवन्ति। एतेष्वेका बुद्धिरपि वर्तते, या हि वस्तुतः समग्रस्यापि व्यवहारस्य सञ्चालिका। यतोऽस्याश्चिन्तनपद्धत्यैव वयं जीवामः।

बान्धवाः! यथा देशस्य सम्यक् प्रशासनाय किञ्चित् संविधानम् आवश्यकन्तथैवास्माकं जीवनगतिः सुचारुविधिना अग्रेसरा भवेत्, सार्थकतया च वयं जीवेमैतदर्थम् अस्मभ्यमपि केषाञ्चन मार्गनिर्देशनम् आवश्यकम्भवति। प्राचीनभारते तु नासीत् जीवनमार्ग-निर्देशकानाम् अल्पत्वन्तदानीं स्वतपस्तेजसा सर्वविध-ज्ञानसम्पन्नानां महर्षीणाम् आचार्याणाञ्च बाहुल्यात् परन्तु अद्यत्वे नास्ति तादृशी सम्पन्नता भारतस्य अन्यस्य वा कस्यचिद् देशस्य। अतः साम्प्रतिकानां जनानां मार्गनिर्देशाय आवश्यकत्वम्भजते तादृशं किमपि विलक्षणं वस्तु, तच्च विशिष्टैः जनहितेच्छुकैः शोध- कर्तृभिः क्रियमाणः शोध एव। तेषां विशिष्टप्रयासेनैव सम्प्रति वयं विकासयुगे जीवामः, यतो वैज्ञानिकैरन्यैश्च क्रियमाणाः शोधा एवास्मान् विभिन्नकार्येषु दैनिकचर्यासु च प्रवर्तयन्ति।

परन्तु पूर्वोक्तानां संस्कृतनिष्ठानां महर्षीणां वंशजाः वयं किमद्यत्वे तेषां कार्यभारं वहन्तः स्मः? किमस्माभिरपि संस्कृतमाध्यमेन समाजोपकारका विषयाः समाजाय प्रदीयन्ते? शोधकार्याणि तु वयमपि कुर्मः परन्तु किम् अस्माकं शोधकार्याणां लेशमात्रमपि लाभः समाजः प्राप्नुवन् अस्ति? नैव खलु! तर्हि सन्दर्भेऽस्मिन् साम्प्रतिकैः विद्वद्वरेण्यैः प्रशासनाधिकारिभिः, शिक्षाक्षेत्र उच्चपदासीनैर्वाऽवश्यमेव योजनीयाः संस्कृतच्छात्राः, येनाद्यापि संस्कृतज्ञत्वेन ख्यातिमाप्नुवन्तो वयं संस्कृतनिष्ठज्ञानं समाजाय दातुं प्रभवेम।

शास्त्राण्यस्माकं द्विधा लोकोपकारकानि भवितुम् अर्हन्ति- साक्षात्, परम्परया च। तत्र वेद-उपनिषत्-साहित्य-धर्मशास्त्र-आयुर्वेद-योग-ज्यौतिष-दर्शन-प्रभृतिशास्त्राणि साक्षात् लोकोपकारकाणि भवन्ति चेत् न्याय-व्याकरणादिविषयाः परम्परया लोकमुपकर्तुम् अर्हन्ति। अतः सर्वैरपि संस्कृतनिष्ठैः विद्वद्भिः छात्रद्वारा क्रियमाणं करिष्यमाणं वा शोधकार्यं प्रायो लोकोप-कारकमेव भवेदिति सर्वथा प्रयत्यते चेद् अवश्यमेवानेन सुप्रयासेन संस्कृतं लोकेप्सितम्भविष्यति।

संस्कृतक्षेत्रीयकार्येषु इदमपि एकं संस्कृतवाण्याः प्रकाशनात्मकं कार्यमिति भवद्भिः अविदितं नास्ति। वार्तापत्रमिदं भवतां समेषां संस्कृतानुरागिणां प्रेम्णा सम्पोषितं सदेवाधुना पर्यन्तं सम्यक् प्रचलद् अस्ति। यदि लेखैः, परामर्शैः, प्रेरणया, उत्साहवर्धनेन चापि भवतां साहाय्यमेतत् प्राप्नुयात् तर्हि निःशङ्कं वक्तुं पारयामः यद् एतद् सन्निकटभविष्यति काले संस्कृतस्यादर्शं वार्तापत्रं सद् आभारतं आविश्वं वा व्याप्तुं शक्ष्यति।

विश्वासोऽयं मे वर्तते, यदि समेऽपि संस्कृतज्ञाः उदारमनस्काः सन्तः परस्परं सहायकाः स्युस्तर्हि अतिशीघ्रमेव संस्कृतं संस्कृतिश्च पुनरपि भारतस्य प्रतिष्ठे भवितुं शक्ष्यतः, यतः परस्परं साहाय्येनासम्भवमपि कार्यं सम्पूर्णतां याति इति शम्।

**- सम्पादकः**


## संस्कृतवाणी

**स्वामित्वम्** - श्रीनिवाससंस्कृतविद्यापीठस्य

**प्रकाशको मुद्रकश्च** - गोविन्दप्रसादशर्मा (गोविन्दाचार्यः)

**परामर्शदातारः**- डॉ.रमाकान्तशुक्लः, प्रो.रमेशकुमार-पाण्डेयः, डॉ.वीरेन्द्रशर्मा, प्रो.पीयूषकान्तदीक्षितः, डॉ.जीतरामभट्टः, आचार्यरामिलनशुक्लः, आचार्यकृष्ण-गोपालसुवेदी, श्रीविष्णुप्रसादशर्मा

**प्रधानसम्पादिका** - डॉ. लक्ष्मीशर्मा

**सम्पादकः** - जीवनशर्मा (+91-9818378284)

**सह-सम्पादकाः** - डॉ.ऋषिराजपाठकः, मधुरकविः आचार्यः, बद्रीनारायणगौतमः

**सम्पादनटङ्कणसहयोगिनः** -दण्डपाणिः आचार्यः, जयन्तकोइराला


## ग्राहकतां स्वीकर्तुम् आवश्यकं विवरणम्

संस्कृतवाणीति पाक्षिक-संस्कृत-पत्रस्य ग्राहकत्वं स्वीकर्तुं **दशवार्षिकशुल्कं** रु 2100/- **पञ्चवार्षिकं** रु 1100/- **द्विवार्षिकं** रु 500/- मनिऑर्डरः, चैकः, ड्राफ्टः, इत्यनेन 'संस्कृतवाणी' इति नाम्नः 174, रामानुजमार्ग, इब्राहिमपुर, दिल्ली-110036 इत्यत्र प्रेषयेयुः। अथवा अस्यां वित्त-कोषसङ्ख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।

**वित्तकोषविवरणम्-**

A/C Name: SANSKRITVANI
A/C No. 409401010011486
Bank Union Bank of India
Branch Mukhmelpur, Delhi
IFSC/MICR Code: UBIN0540943


आयुर्वेदस्य तथा च तदितरसंस्कृतवाङ्मयस्य दुर्लभग्रन्थान् सर्वसुलभान् सम्पादयितुं प्रकाशनम्-

## चौखम्बा सुरभारती प्रकाशन
## चौखम्बा पब्लिशिंग हाउस

अत्र हि भारतस्य समेषां पारम्परिकानाम् आधुनिकानां च विश्वविद्यालयानां मध्यमा-शास्त्री-आचार्य-बी.ए-एम.ए.प्रभृतिकक्षाणांपाठ्यक्रमानुसारम् आयुर्वेद-वेद-वेदाङ्ग-वेदान्त-व्याकरण-साहित्य-दर्शन-ज्यौतिष-धर्मशास्त्र-कर्मकाण्डादि-विषयकग्रन्थाः प्राप्यन्ते। किञ्च बी.एड.-एम.एड.पी.एच्.डी-नेट/जेआरएफ-प्रभृतिप्रतियोगिताभ्यः सहायक-पुस्तकान्यपि।

**मुख्यकार्यालयः**- चौखम्बा सुरभारती प्रकाशन, के-31/117, गोपालमन्दिरलेन, पो.बा.नं. 1129, वाराणसी- 221001, दूरभाषः- 0542-2335263
**सहायककार्यालयः**- चौखम्बा पब्लिशिंग हाउस, 4697/2, भूतल, गली नं.21-ए, अंसारी रोड, दरियागंज, दिल्ली-110002 दूरभाषः - 011-23286537, मो. 9811133683


## श्रीगोविन्दाचार्यप्रतिष्ठानस्य प्रकाशनानि

**प्रकाशिताः/उपलब्धाः ग्रन्थाः -**

१. **श्रीभाष्यम्** (मूलमात्रम्) सजिल्द ८००- अजिल्द ३००/-
२. **वेदान्तसार**, श्रीरामानुजाचार्यकृत (हिन्दीव्याख्या) पृष्ठसंख्या-५१०, मूल्य सजिल्द ८००- अजिल्द ३००/-
३. **श्रीविष्णुसहस्रनामानुष्ठानम्** (नक्षत्रानुसारि) पृष्ठसंख्या-११४, मूल्यम् -१००/-
४. **श्रीसुदर्शनानुष्ठानम्** (पूजन-हवनपद्धतिः मूलपाठश्च) पृष्ठसंख्या १२०, मूल्यम् - १५०/-
५. **श्रीसुदर्शनानुष्ठानम्** (पूजनविधि-हवनपद्धति-मूलपाठ-शब्दार्थसहित-हिन्दीव्याख्या। पृ.सं. २४०, मूल्यम् - ३००/-
६. **श्रीनिवासस्तोत्रमाला** (शताधिकश्रीवैष्णवीयस्तोत्राणां संग्रहः) पृ.सं. ३३२, मूल्यम् - १५०/-
७. **तत्त्वमुक्ताकलापः** (हिन्दीटीकासहितः) पृष्ठसंख्या-५५०, मूल्य सजिल्द ८००
८. **तत्त्वमुक्ताकलापः** (सर्वङ्कषाव्याख्यासहितः) पृष्ठसंख्या-८५०, मूल्य सजिल्द ८००
९. **श्रीधनुर्मासोत्सव** (संक्षिप्तगोदाम्बाव्रतम्)। हिन्दीव्याख्या, पृष्ठसंख्या-१५३, मूल्यम्- १११/-
१०. **संक्षिप्तविशिष्टाद्वैतपदार्थकोशः**, मूल्यम् - ३००/-
११. **ब्रह्मसूत्रसुधाबिन्दुः**, मूल्यम् - ८००/-
१२. **नित्यानुसन्धानम्** (स्तोत्रसंग्रहः, हिन्दीभाषानुवादः)।
१३. **नित्यानुसन्धानम्** (स्तोत्रसंग्रहः, नेपाली-भाषानुवादः)। पृष्ठसंख्या -, मूल्यम्-११०/-
१४. **जगद्गुरु श्री रामानुजाचार्य** (संक्षिप्तजीवनवृत्तम्) पृष्ठसंख्या-५८, मूल्यम्-५१/-
१५. **श्रीवेंकटेश भगवान** (पृष्ठसंख्या-३२, मूल्यम् -२१/-)
१६. **श्रीविष्वक्सेन माहात्म्य** (पूजाविधि सहित) (पृष्ठसंख्या-१४४, मूल्यम् -१५०/-)
१७. **श्रीअक्षर महादेवी वैभव**, मूल्यम्- ८०/-
१७. **प्रणववादार्थदीपिका** (संस्कृतम्)।
१८. **प्रणववाद सार** (हिन्दी)।
२०. **श्री अक्षर गोमाता वैभव** (हिन्दीपद्यात्मकम्)।
२१. **श्री अक्षर दुर्गासप्तशती** (हिन्दीपद्यात्मकम्)।
२२. **श्री अक्षर रामायण** (हिन्दीपद्यात्मकम्)।
२३. **श्री अक्षर गीता** (हिन्दीपद्यात्मकम्)।

**प्रकाशोन्मुखाः ग्रन्थाः -**

१. **श्रीसम्प्रदाय : एक परिचय** (अनुमानितपृ.सं. ९००)
२. **श्रीरामानुजग्रन्थाः** (श्रीरामानुजाचार्यस्वामिनां समेषां ग्रन्थानाम् एकत्र संग्रहः सम्पादनञ्च।)
३. **वेदार्थसंग्रहः** (हिन्दीव्याख्या, श्रीधरमुखोल्लासिनी)
४. **ब्रह्मसूत्रसारः** (हिन्दीव्याख्या)
५. **वेदान्तदीपः** (श्रीधरमुखोल्लासिनी, हिन्दीव्याख्या)
६. **श्रीभाष्यम्** (श्रीधरमुखोल्लासिनी, हिन्दीव्याख्या)
७. **कर्मकाण्डदीपिका**
८. **श्रीविष्णुसहस्रनामभाष्यम्**
९. **विविधश्रीवैष्णवीयस्तोत्राणां हिन्द्यनुवादः**

## श्रीगोविन्दाचार्य प्रतिष्ठान

**भारतीयसंस्कृतेः संस्कृतस्य वेदान्तस्य च विशेषरूपेण श्रीवैष्णवसम्प्रदायस्य विविधग्रन्थानां प्रकाशकः**


**सम्पर्कः**- 107, नियर श्रीनिवास गौशाला एवं सरिया फैक्ट्री, इब्राहिमपुर गांव, दिल्ली-110036
+91-9818378284,9810429487, sgpspratisthan@gmail.com

# उपपदतत्पुरुषविचारः

**- अर्चना शर्मा, सहायकाचार्या**
केन्द्रीयविश्वविद्यालयः, धर्मशाला, हिमाचलप्रदेशः

भगवता पाणिनिना संज्ञापरिभाषादिक्रमेण नैकविधानि सूत्राणि स्वीयाष्टाध्यायीनामके ग्रन्थे निगदितानि, तानि च यथाप्रकरणं तत्तदध्यायेषु निबद्धानि। तत्रैव द्वितीयाध्यायस्य प्रथमद्वितीययोः पादयोः समासवृत्तिविधायकानि सूत्राणि पठितानि। तेषु यथाक्रममादितोऽव्ययीभावसमासस्य ततः परं तत्पुरुष-बहुव्रीहि-द्वन्द्वसमासविधायकानि सूत्राणि व्यवस्थितानि।

तत्रापि तत्पुरुषसमासस्य द्वितीयादिक्रमेण, कर्मधारयद्विगुसमाहारादिक्रमेण च नैकविधभेदाः प्रदर्शिताः। तेष्वन्यतमो भेदो वर्तते 'उपपदतत्पुरुषसमासः' इति। अस्मिन् समासाधिकारे द्वितीये पादे उपपदतत्पुरुषविधायकानि चत्वारि सूत्राणि सूत्रकारेण ग्रथितानि। तेषु प्रधानं सूत्रम्- **उपपदमतिङ्**[१] इति। सूत्रस्यास्य मीमांसा सूत्रभाष्यादिषु अत्यन्तं गभीरा वर्तते। पदविभागदृष्ट्या सूत्रमिदम् **उपपदम्, अतिङ्** इति द्विपदात्मकम्। तथापि सूत्रार्थोपपत्तये **समर्थः पदविधिः**[२], इत्यस्मात् समर्थस्य, **सुबामन्त्रिते पराङ्गवत्स्वरे**[३] इति सूत्रात् सुप् इत्यस्य, **नित्यं क्रीडाजीविकयोः**[४] इति सूत्रात् नित्यम् इत्यस्य तथा च **प्राक्कडारात् समासः** इत्यस्मात् 'समासः' इत्यस्य च लाभे सति काशिकावृत्त्यनुसारं समग्रसूत्रार्थो भवति- **उपपदमतिङन्तं समर्थेन शब्दान्तरेण सह नित्यं समस्यते, तत्पुरुषश्च समासो भवति**[५]। भट्टोजिदीक्षितानुसारं च सूत्रस्यास्य भावार्थो भवति यत्- **उपपदं सुबन्तं समर्थेन नित्यं समस्यते**[६] इति। उपपदमतिङन्तं समर्थेन समस्यते इति व्याख्याने तु सुबिति नानुवर्तेत। ततश्च चर्मकार इत्यत्र नलोपो न स्यादिति[७]।

अष्टाध्याय्याम् अनेकविधानि सूत्राणि ज्ञापकसिद्धानि सन्ति अर्थात् सूत्रेषु प्रदत्तानि पदानि कमपि विशिष्टं नियमं ज्ञापयन्ति। तेष्वेव इदं सूत्रम् अस्ति- **उपपदमतिङ्**। अत्र 'अतिङ्' इति पदग्रहणात् एका विशिष्टा परिभाषा प्रस्फुटिता भवति यत्- **गतिकारककोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः**[८]।

अस्य भावार्थो भवति यत्- गतीनां कारकाणाम् उपपदानां च कृद्भिः सह यस्समासः, तत्र उत्तरपदात् सुबुत्पत्तेः प्रागेव समासः करणीयः' इति। तेन अत्र 'सुप्सुपा' इति न सम्बध्यते, इति[९]। तद्यथा-

**गतिसमासविषये**- व्याजिघ्रतीति व्याघ्रः। व्याङ्पूर्वात् घ्राधातोः **आतश्चोपसर्गे**[१०] इति कप्रत्ययः, **आतो लोप इटि च**[११] इत्याल्लोपः। ततः सुबुत्पत्तये संख्याकर्मादियोगो विवक्षितव्यः, तद्योगाच्च प्रागेव लिङ्गयोगः **स्वार्थमभिधाय शब्दो.....** इति न्यायात्, अर्थात्- स्वार्थद्रव्यलिङ्गसंख्याकारक- प्रयुक्तकार्याणां क्रमिकत्वस्य **कुत्सिते** इतिसूत्रभाष्ये प्रतिपादितत्वात्। ततश्च लिङ्गनिमित्तः प्रत्ययो भवन् घ्रशब्दमात्रस्य जातिवाचित्वाभावादाप् स्यात् ततश्च व्याङोः घ्राशब्दे न समासः, ततो व्याघ्राशब्दस्य जातित्वेऽप्यन- कारन्तत्वाद् जातिलक्षणो ङीष् न स्यात्। प्राक् सुबुत्पत्तेः समासो भवन् लिङ्गयोगमपि नापेक्षत इत्यन्तरङ्गत्वात् स एव भवति, पश्चात् स्त्रीप्रत्ययो भवन् ङीषेव भवति। पूर्वपदस्य तु सुबन्तत्वात् पदकार्याणि भवन्ति।

**कारकस्योदाहरणम्**- अश्वेन क्रीतेति विग्रहे **कर्तृकरणे कृता बहुलम्**[१२] इति सामसः, **क्रीतात् करण-पूर्वात्**[१३] इति ङीष्। अत्र हि सुबुत्पत्तौ सत्यां यदि समासः स्यात् तदा अन्तरङ्गत्वात् पूर्वं टाप् स्यात्, ततः सुप्, ततश्च समासः। इत्थम् अदन्तत्वाभावात् ङीष् प्रत्ययो न स्यात्। प्राक्सुबुत्पत्तेः समासे तु पूर्ववदिष्टसिद्धिः भवतीति।

**उपपदस्योदाहरणम्**- कच्छपेन पिबतीति। **सुपि स्थः** इत्यत्र सुपीति योगविभागात् कः। ततः सुबन्तापेक्षायाम् उक्तरीत्या टाबेव स्यात्, न तु जातिलक्षणङीषिति भावः।

परिभाषाया ज्ञापनम्-

अस्याः परिभाषाया ज्ञापनस्य स्वरूपमिदं भवति यत् **सह सुपा**[१४] इति सूत्रात् सुपेत्यनुवर्तते तेन सुबन्तस्य स्वत एव अतिङन्तेन = सुबन्तेनैव समासविधानसम्भवात्। अतिङ् इति निषेधग्रहणस्य वैयर्थ्यापत्तिस्तस्मादिदमेवातिग्रहणं व्यर्थं सत् प्रथममिदं ज्ञापयति यत् 'अतिङ्'ग्रहणात् सूत्रेऽस्मिन् सुप्सुपा इत्यनयोरनुवृत्तिर्न भवति। **कुगतिप्रादयः** इति सूत्रेऽपि गतिरित्यस्य योगविभागं कृत्वा अस्मात् सूत्रात् अतिङ्ग्रहणम् अपकृष्य कुप्रादयः सुबन्तेन, गतिस्तु समर्थेन समस्यते इति सूत्रार्थो भवति। तेन गतिसमासेऽपि सुपा इति नानुवर्तत इति सिद्धम्। ततश्चेयं परिभाषा सिद्धा भवति यत् गति-कारकोपपदाम्.... इति। तत्र हि भाष्येऽपि- **अतिङिति किमर्थं?** इति प्रश्नं कृत्वा, तस्य समाधानरूपेण- **कारको व्रजति। हारको व्रजति** इत्युक्तम्[१५]। यदि उपपदं समर्थेन सह समस्यत इत्यर्थः स्वीक्रियेत तदात्रापि समासोत्पत्तिः स्यादिति तात्पर्यम्।

अत्र सूत्रे अतिङ् इति पदे तिङ् इत्यनेन तिङर्थः विवक्षितः। तिङर्थस्तु क्रिया। अतः भाष्यकारेणापि- **उपपदमतिङिति तदर्थप्रतिषेधकः**[१६] इति समाधानवार्तिकं पठित्वा पुनः **क्रियाप्रतिषेधो वा**[१७] इति व्यासान्तरवार्तिकं पठितम्।

क्रियायाः प्रतिषेधकात् कारको गत, कारको यातः। इत्यत्र समासो न भवति। अन्यथात्रापि कारकगतः। कारकयातः इति स्यात्। सूत्रे अतिङ्-ग्रहणात् **मा भवान् भूत्** इत्यत्रापि समासाभावः, अन्यथा **माङि लुङ्** इति सप्तम्यन्तपदघटित-सूत्रेण 'माङि' इत्यनेन निर्दिष्टं यत् माङिति पदं तस्यापि समर्थभूतेन तिङन्तेन समासापत्तिः स्यात्।

'परिभाषेन्दुशेखरः' इति ग्रन्थानुसारमपि सूत्रेऽस्मिन् 'सुप्, सुपा' इत्येतयोरप्यनुवत्तिर्न भवति। परिभाषेन्दुशेखरस्य मूले ग्रन्थकारो नागेशो ब्रूते यत्- **तयोः सूत्रयोः सुप्सुपा इत्यस्य निवृत्तैकदेशानुमत्या कारकांशे च सिद्धेयमिति**[१८]। किञ्च व्याख्यानेनेदं ज्ञायते यत् सुपा इत्यस्यैवानुवृत्तिर्न भवति। तात्पर्यमिदमवधेयं यद् उपपदमित्यस्याः संज्ञायाः अन्वर्थसंज्ञाबलादेव पदत्वं सिद्धं भवति, तथैव गतिसंज्ञकानि पदान्यपि। तेन अनुवृत्तेः फलाभावात् सुप्सुपा इत्युभयस्यापि निवृत्तिरित्युक्तम्। सूत्रेऽस्मिन् उपपदपदं **तत्रोपपदं सप्तमी-स्थम्**[१९] इति सूत्रेण विधीयमानं संज्ञाविशेषं स्वीक्रियते न तु समीपोच्चारितं पदमिति। तद्यथा- **कर्मण्यण्**[२०] इति सप्तम्यन्तपदघटितं शास्त्रम् अस्ति, तत्र सप्तम्यन्तपदं कर्मणीति, तेन बोध्यं यत् कुम्भादि, तद्वाचकं पदं कुम्भादिपदं तदेव अत्रोपपदसंज्ञकत्वेन गृह्यत इति। यद्यत्रापि उपोच्चारितं पदमुपपदं गृह्येत, तदातिप्रसङ्गः स्यात् राजश्रितमित्यत्रापि प्राक् सुबुत्पत्तेः समासप्रसङ्गात्। ततश्च पदत्वाभावान्नलोपो न भवति? असर्वविषयत्वादस्य ज्ञापकस्येत्यदोषः। **सुबामन्त्रिते**[२१] इति सूत्रात् सुबित्यनुवृत्तिसामर्थ्यात् पूर्वपदं तु सुबन्तमेव समस्यत[२२] इति। न ह्यनेन सर्वत्र 'गति-कारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः समासो भवति' इति ज्ञाप्यते, किं तर्हि? क्वचिदेवेष्टविषये। कथमेतज्ज्ञायते चेत् **तत्पुरुषे कृति बहुलम्**[२३] इति कृदन्त उत्तरपदे सप्तम्या अलुग्विधानात्। तेनास्याः परिभाषाया अनित्यत्वं सिद्धं भवति। अत एव मूलेऽपि नागेशेनोक्तं यत्- अस्याः अनित्यत्वात् क्वचित् सुबुत्पत्त्यन्तरमपि समासो यथा- सा हि तस्य **धनक्रीते**ति[२४]। केचन विद्वांस आमनन्ति यद् अस्याः परिभाषायाः अनित्यत्वे मानं नास्तीति[२५]। अत्र न्यासकारोऽप्याह- यदि सर्वत्रैव 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति स्यात् तर्हि सप्तम्याः कृदन्त उत्तरपदेऽलुग्विधानं नोपपद्यते। तस्मात् क्वचिदेव प्राक् सुबुत्पत्तेः समासः न सर्वत्रेति भवति। अत एवैषा परिभाषा अनित्या। एवञ्च कृत्वा **सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी** इत्यादौ टाबन्तेन समास उपपन्नो भवति[२६]। प्रकृतं सूत्रं विभाषाधिकारे पठितं तेन वैकल्पिके समासे प्राप्ते नित्यविधानाय पूर्वसूत्रात् नित्यमिति अनुवर्तते।

उपपदतत्पुरुषप्रकरणेऽपरं सूत्रं भगवता पठितम्- **अमैवाव्ययेन**[२७] इति। तत्र हि पूर्वसूत्रेणैव समासे सिद्धे सूत्रमिदं नियमार्थं भवति यद् **अव्ययेनोपपदस्य यः समासः सोऽमैव भवति, नान्येन।**[२८]

अत्रेदमवधेयम् - अम्प्रत्ययमात्रविधायकशास्त्रेण अमैव सह यस्योपपदसंज्ञा विधीयते तदुपपदमव्ययेन समस्यत[२९] इति। अत्रोदाहरणत्वेन 'स्वादुङ्कारं भुङ्क्ते, सम्पन्नङ्कारं भुङ्क्ते' इत्यादीनि प्रदत्तानि काशिकाकारेण कौमुदीकारेण च। स्वादुङ्कारम् इत्यत्र **स्वादुमि णमुल्** इत्यनेन णमुल् प्रत्ययो विहितः, अत्र हि स्वादुमीत्यत एव निपातनात् पूर्वपदस्य मान्तत्वम्। स्वादुमि इति अर्थग्रहणम्। तेन सम्पन्नकारमित्यत्रापि भवति।

'स्वादुम् अम् कृ णमुल्' इत्यवस्थायां **कृन्मेजन्तः** इत्यनेनाव्ययसंज्ञा भवति। **स्वादुमि णमुल्**[३०] इति सूत्रघटकेन **स्वादुमि** इति सप्तम्यन्तपदेन बोध्यस्य **स्वादुम्** इत्यस्योपपदस्य **कारम्** इत्यमन्ताव्ययेन सह समासोऽनेन सूत्रेण भवति। सूत्रे अमैव इति पदग्रहणात् 'कालः समयो वेला वा भोक्तुम्' इत्यत्र समासो न भवति। सूत्रे यद्यपि काल-समयवेलासु[३१] इति सप्तम्यन्तपदेन बोध्याः कालादिशब्दाः उपपदसंज्ञकाः तथापि तुमुन्प्रत्ययस्यामन्तत्वाभावात् समासाभावः। पुनश्चात्र एवकारनिर्देशः उपपदविशेषणार्थः। तेन- 'अमैव यत्तुल्यविधानमुपपदं तस्य समासो भवति' इति गम्यते। यत्र तु अमा चान्येन च तुल्यविधानम्, तत्र न। यथा- 'अग्रे भुक्त्वा। अग्रे भोजनम्।' अत्राग्रेशब्दः उपपदसंज्ञकः किञ्च **विभाषाग्रे प्रथमपूर्वेषु**[३२] इत्यनेन क्त्वाणमुलौ प्रत्ययौ विधीयते तेन अमा सह प्रत्ययान्तर-विधानेन तुल्यविधानाभावात् समासो न भवति। यतो हि अम्प्रत्ययेन क्त्वाप्रत्ययेन च सह उपपदसंज्ञा अग्रेपूर्वप्रथम-शब्दानां विहिता, तेन उपपदत्वस्य अमैव तुल्यविधानाभावाद् उपपदसमासो न भवति। तथैव **उपदंशस्तृतीयायाम्**[३३] इत्यतः **अन्वच्यानुलोम्ये**[३४] इत्यन्तम् अष्टादशसूत्रेषु यानि तृतीया-प्रभृतीनि उपपदानि निर्दिष्टानि तानि पदानि अमन्ताव्ययेन सह विकल्पेन समस्यन्ते।

तत्र हि उपपदसमासप्रकरणे सूत्रमिदं पठितम्- **तृतीयाप्रभृतीन्यन्यतरस्याम्**[३५]। अत्र उभयत्रविभाषा वर्तते। यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते, इति। यथा- **उपदंशस्तृतीयायाम्** इत्यनेन 'मूलकेनोपदंशं भुङ्क्ते' इत्यत्र दंशधातोः णमुल्प्रत्यये कृते दंशमित्यमन्तमव्ययं निष्पन्नं भवति। अत्र हि मूलकेनेति तृतीयान्तस्य उपदंशमित्यनेनामैव तुल्यविधानं वर्तते। तेन **अमैवाव्ययेन** इत्यनेनैव समासे सिद्धेऽनेन विकल्प्यते, अतः प्राप्तविभाषा सिद्धा।

उच्चैःकारमाचष्टे उच्चैः कारम्, इत्यत्र **अव्ययेऽथाभिप्रेताख्याने कृञः क्त्वाणमुलौ**[३६] इत्यनेन कृञः धातोः क्त्वाणमुलौ प्रत्ययौ भवतः, तेनामैव तुल्यविधानाभावाद् **अमैवाव्ययेन** इत्यनेन समासेऽप्राप्तेऽनेन विकल्प्यत इत्यप्राप्तविभाषा। अस्मिन् सूत्रे महाविभाषाधिकारादेव विभाषासिद्धे पुनः अन्यतरस्यां ग्रहणं, नित्यं क्रीडाजीविकयोः इति सूत्रानुवृत्तस्य नित्यशब्दस्य प्रतिषेधार्थम् अस्ति।

उपपदतत्पुरुषसमासप्रकरणे अपरं चतुर्थं सूत्रमस्ति- **क्त्वा च**[३७]। अस्य भावार्थो भवति- क्त्वाप्रत्ययान्तेन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति। अस्योदाहरणम्- उच्चैः कृत्य। उच्चैः कृत्वा। अत्रापि **अव्ययेऽयथाभिप्रेताख्याने...**[३८] इति क्त्वाप्रत्ययो भवति। समासस्य विकल्पात् पक्षे ल्यबादेशो न भवति। इत्यनेन प्रकारेण उपपदसमासविधायकेषु चतुर्षु सूत्रेषु वैभिन्यं दरीदृश्यत इत्यलं विस्तरेण।

1 अष्टाध्यायीसूत्रम्- 2/2/19, 2 पाणिनीयसूत्रम्- 2/1/1, 3 पाणिनीयसूत्रम् 2/1/2, 4. पाणिनीयसूत्रम्- 2/2/17, 5. काशिकावृत्तिः- 2/2/219, 6. वैयाकरणसिद्धान्ताकौमुद्याः समासप्रकारणम्, 7. तत्रैव बालमनोरमाटीकायाम्, 8. पाणिनीयसूत्रस्य वृत्तौ- 2/2/20, 9 काशिकावृत्तिः 2/2/19, 10. पाणिनीयसूत्रम्- 3/1/136, 11. पाणिनीयसूत्रम्- 6/4/64, 12 पाणिनीयसूत्रम्- 6/4/64, 14. अष्टाध्यायीसूत्रम् 2/1/4, 15. महाभाष्यम्- 2/2/19, 16. महाभाष्यम्- 2/2/19, 17. महाभाष्यम्- तत्रैव, 18 परिभाषेन्दुशेखरस्य शास्त्रशेषप्रकरणम् परिभाषा सं 76, 19. पाणिनीयसूत्रम्- 3/1/92, 20. पाणिनीयसूत्रम्- 6/4/64, 21. पाणिनीयसूत्रम्- 2/1/2, 22. पदमञ्जरीटेका- 2/2/19, 23. पाणिनीयसूत्रम्- 6/3/14, 24. परिभाषेन्दुशेखरस्य शास्त्रशेषप्रकरणम् परिभाषा सं. 76, 25. अन्ये तु अनित्यत्वे न मानम्, तत्र अजादित्वाट्टाबित्याहुः। तत्रैव, 26. पाणिनीयसूत्रम्- 2/2/19, 27. अष्टाध्यायीसूत्रम्- 2/2/20, 28. काशिकावृत्तिः 2/2/20, 29. वैयाकरणसिद्धान्तकौमुद्याः बालमनोरमा 2/2/20, 30प पाणिनीयसूत्रम्- 3/4/26, 31. पाणिनीयसूत्रम्- 3/3/167, 32. पाणिनीयसूत्रम्- 3/4/24, 33. पाणिनीयसूत्रम्- 3/4/47, 34. पाणिनीयसूत्रम्- 3/4/64, 35. पाणिनीयसूत्रम्- 2/2/21, 36. पाणिनीयसूत्रम्- 3/4/59, 37. पाणिनीयसूत्रम्- 2/2/22, 38. पाणिनीयसूत्रम्- 3/4/69